DHATURUPA MANJARI

An Easy Text on Sanskrit Verbs



Sanskrit Study Made Easy Series

A Reformed Series of Four Illustrated Sanskrit Readers.
With Grammatical and Conversational Exercises,
Glossary etc.,
For a Pleasant & Quick Study of Sanskrit.

Most widely used throughout India and Foreign Countries
Viz: Ceylon, Siam, Bangkok, Germany, Italy, Australia,
California, San Francisco etc.

AND SELECTED BY THE EMBASSY OF INDIA

and The Ministry of Education and Scientific Research of Govt. of India for presentation to foreign students of Sanskrit

FOREWORD

' भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती '

No other Language equals to the Marvels of the Sanskrit Language in its vast contribution of Precious Lores of ancient Vedic and Modern Sanskrit Literature relating to all the branches of Learning. Sanskrit Language is also rich in its Grammar and Verbal Forms.

Vyakarana forms the basis of Sanskrit Scholarship and the same learnt analytically will be very easy to master and also for a long remembrance.

The study of Sanskrit will be considerably more easy than it is, if Texts specially adopted for beginners are available.

With the above objects in view the Revised Edition of this book is compiled on the basis of the well known Educational Maxim "Proceeding from the Simple to the less Simple". Particular care has therefore been taken not to overburden the students, but to awaken their interest and encourage the study with Zeal and enthusiasm.

Special mention may be made here that instead of adding the entire धातुकोश as an Appendix, the most common and important Roots are given in the Alphabetical order at the beginning of each conjugation with Sanskrit and English meanings and with the Present Tense Form.

A Novel Edition of शब्दमञ्जरी with a most interesting and illustrative chapter on समास प्रकरण is also now Edited as a companion volume to this धातुरूपमञ्जरी for supplementing the Study of Sanskrit Grammar.

Kalpathi-Palghat-3. 4—7—1960

L. ANANTARAMA SASTRI,
Vyakarana Siromani.

अनुक्रमणिका— CONTENTS

विषयाः　　　　　　　　　　　　　　　　　　　　　　　　　　पृष्ठसंख्या

प्रार्थना - Prayer

॥ श्रीरामजयम् ॥

॥ ॐ नमः श्री गणेश शारदा गुरुभ्यो नमः ॥

॥ ॐ नमः श्री शब्दब्रह्मात्मने श्री नटराजराजाय नमः

॥ ॐ नमः शब्दविद्यासंप्रदायकर्तृभ्यो नमो महद्भ्यो नमो गुरुभ्यः ॥

येनाक्षरसमाम्नायम् अधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ १ ॥

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥ २ ॥

व्याकरणं अवश्यं पठनीयम्

तथा च उक्तम् अभियुक्तैः—

शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे ।
रोद्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना ॥ १

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत् ॥ २

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ ३

अपि च—सर्वस्य नेत्रं व्याकरणम् !

एकः शब्दः सम्यक् ज्ञातः, सुष्ठु प्रयुक्तः, स्वर्गे लोके कामधुक् भवति

*महाभाष्यं वा पठनीयम् ! महाराज्यं वा शासनीयम् ! !

---

* महाभाष्यम् = भगवत् पतञ्जलिमहर्षि विरचितं 'पाणिनीय व्याकरण महाभाष्यम्' ॥

॥ श्रीरामजयम् ॥

॥ श्री पाणिनि वररुचि पतञ्जलिभ्यो नमः ॥

॥ विद्यया विन्दते अमृतम् ॥

॥ धातुरूपमञ्जरी ॥

॥ प्रस्तावना ॥

संस्कृतभाषायां प्रायेण २२०० धातवः (Roots) सन्ति । तेषाम् एकैकस्यापि धातोः [1]दश लकाराः (Tenses and Moods) संभवन्ति । तेषु षट् लकाराः कालवाचकाः (Tenses) चत्वारः प्रकारबोधकाः (Moods) । यथा —

षट् कालवाचकाः—Six Tenses.

viz., one Present Tense, 3 kinds of Past Tense and 2. kinds of Future Tense.

TENSES

	Name	Sanskrit	English	Example
1.	लट्	वर्तमानः	Present	भवति
2.	लङ्	अनद्यतनभूतः	Past Tense, Imperfect	अभवत्
3.	लुङ्	भूतः	Past Tense, Aorist	अभूत्

1. Besides the 10 लकारs. there is one more लकार- viz , लेट् । This is used only in Vedas, and is hence termed 'The Vedic Subjunctive.' These technical names are given in the following कारिका ।

लट् वर्तमाने लेट् वेदे भूते लुङ्लङ्लिटस्तथा ।

विध्याशिषोस्तु लिङ्लोटौ लुट् लृट् लृङ् च भविष्यति ॥

4.	लिट्	परोक्षभूतः	Past Tense, Perfect	बभूव
5.	लुट्	अनद्यतनभविष्यन्	First Future	भविता
6.	लृट्	भविष्यन्	Second Future	भविष्यति

चत्वारः प्रकारबोधकाः—Four Moods.

1.	लोट्	आज्ञा	Imperative	भवतु
2.	विधिलिङ्	विधिः	Potential	भवेत्
3.	आशीर्लिङ्	आशीः	Benedictive	भूयात्
4.	लृङ्	क्रियातिपत्तिः (संकेतः)	Conditional	अभविष्यत्

एतेषाम् एकैकस्यापि लकारस्य स्थाने पृथक् पुरुषप्रत्ययाः (Personal Terminations) भवन्ति । पुरुषाश्च त्रयः सन्ति—

प्रथमपुरुषः	Third Person.
मध्यमपुरुषः	Second Person.
उत्तमपुरुषः	First Person.

पुरुषाणां प्रत्येकं त्रीणि वचनानि विद्यन्ते ।

एकवचनम्	Singular	एकत्व बोधकम्
द्विवचनम्	Dual	द्वित्व बोधकम्
बहुवचनम्	Plural	बहुत्व बोधकम्

पुरुषप्रत्यया एव 'तिङः' इत्युच्यन्ते । तिङां 'परस्मैपदम्', 'आत्मनेपदम्' इति द्वे पदे स्तः । केभ्यश्चन धातुभ्यः परस्मैपदमेव भवति, ते धातवः 'परस्मैपदिनः' इत्युच्यन्ते ।

केभ्यश्चन आत्मनेपदमेव, ते 'आत्मनेपदिनः' इत्युच्यन्ते। केभ्यश्चन उभयमपि पदं संभवति, ते 'उभयपदिनः' इत्युच्यन्ते॥

परस्मैपदम् आत्मनेपदम् इत्यन्वर्थे संज्ञे। तथा हि— पचनादिका क्रिया लोके परार्था आत्मार्था च संभवति। यत्र परस्य उपयोगाय क्रिया प्रवर्तते तत्र परस्मैपदम्; यत्र तु आत्मन उपयोगाय, तत्र आत्मनेपदं प्रयोक्तव्यम् इति व्यवस्था। यथा—सूदः पचति—परस्मैपदम्, रामः पचते—आत्मनेपदम्। परं तु व्यवस्था इयमधुना नाद्रियते। परस्मैपदम्, आत्मनेपदं च निर्विशेषं प्रयुञ्जते कवयः॥

लकाराः सार्वधातुकाः (Conjugational Tenses and Moods), आर्धधातुकाः, (Non-Conjugational Tenses and Moods) इति द्वेधा विभक्ताः। लट्, लङ्, लोट्, विधिलिङ् इत्येते चत्वारः सार्वधातुकाः। अन्ये षट् आर्धधातुकाः। तत्र सार्वधातुकेषु लकारेषु धातूनां प्रत्ययानां च मध्ये विकरणाख्याः प्रत्ययाः संयोज्यन्ते। तथा हि 'भवति' इत्यादौ अंशत्रयमस्ति—भू+अ+ति। 'भू' इति धातुः, 'अ' इति विकरणप्रत्ययः, 'ति' इति पुरुषप्रत्ययः॥

विकरणप्रत्ययाः दशविधाः। तेषां भेदमनुसृत्य धातवः दशसु गणेषु विभज्य पठिताः। तथा हि—

गणः	नाम	धातुः	विकरणप्रत्ययः	पुरुष-प्रत्ययः परस्मै	पुरुष-प्रत्ययः आत्मने	रूपाणि परस्मैपदम्	रूपाणि आत्मने-पदम्
प्रथमः	भ्वादिः	भू	अ	ति	—	भवति	—
		वन्द्	अ	—	ते	—	वन्दते
द्वितीयः	अदादिः	अद्	—	ति	—	अत्ति	—
		आस्	—	—	ते	—	आस्ते
तृतीयः	जुहोत्यादिः	हु	—	ति	—	जुहोति	—
		हा	—	—	ते	—	जिहीते
चतुर्थः	दिवादिः	दिव्	य	ति	ते	दीव्यति	दीव्यते
पञ्चमः	स्वादिः	सु	नु	ति	ते	सुनोति	सुनुते
षष्ठः	तुदादिः	तुद्	अ	ति	ते	तुदति	तुदते
सप्तमः	रुधादिः	रुध्	न	ति	ते	रुणद्धि	रुन्धे
अष्टमः	तनादिः	तन्	उ	ति	ते	तनोति	तनुते
नवमः	क्र्यादिः	क्री	ना	ति	ते	क्रीणाति	क्रीणीते
दशमः	चुरादिः	चुर्	अय	ति	ते	चोरयति	चोरयते

आर्धधातुकेषु लकारेषु विकरणनिमित्तको रूपभेदो नास्ति। सर्वेभ्योऽपि धातुभ्यः तत्तत्पुरुषप्रत्ययानां संयोजनेन तुल्ययैव विधया रूपाणि निष्पाद्यन्ते। तत्र इडागमकृतो विशेषः परं वर्तते। स च आर्धधातुकप्रकरणे निरूपयिष्यते ॥

इह प्रथमं सार्वधातुकेषु लकारेषु रूपाण्युदाहृत्य पश्चात् आर्धधातुकेषु उदाहरिष्यामः ॥

सार्वधातुकानां लकाराणां स्थाने जायमानाः पुरुषप्रत्ययाः—

परस्मैपदप्रत्ययाः | आत्मनेपदप्रत्ययाः

लट्—Present Tense.

	परस्मैपद			आत्मनेपद		
प्र. पु.	ति	तः	अन्ति	ते	इते	अन्ते
म. पु.	सि	थः	थ	से	इथे	ध्वे
उ. पु.	मि	वः	मः	इ	वहे	महे

लङ्—Imperfect (Past) Tense.

	परस्मैपद			आत्मनेपद		
प्र. पु.	त्	ताम्	अन्	त	इताम्	अन्त
म. पु.	स्	तम्	त	थाः	इथाम्	ध्वम्
उ. पु.	अम्	व	म	इ	वहि	महि

लोट्—Imperative Mood

	परस्मैपद			आत्मनेपद		
प्र. पु.	तु	ताम्	अन्तु	ताम्	इनाम्	अन्ताम्
म. पु.	—	तम्	त	स्व	इथाम्	ध्वम्
उ. पु.	आनि	आव	आम	ऐ	आवहै	आमहै

विधिलिङ्—Potential Mood.

	परस्मैपद			आत्मनेपद		
प्र. पु.	ईत्	ईताम्	ईयुः	ईत	ईयाताम्	ईरन्
म. पु.	ईः	ईतम्	ईत	ईथाः	ईयाथाम्	ईध्वम्
उ. पु.	ईयम्	ईव	ईम	ईय	ईवहि	ईमहि

उपसर्गाः—Prepositions

The उपसर्गs are prefixed to the verbs, to modify, intensify and sometimes to alter the original sense of the roots. Sometimes they are prefixed without any alteration in the sense.

१. धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।
तमेव विशिनष्टयन्यः उपसर्गगतिस्त्रिधा ॥

२. उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥

e.g., the root हृ = (to take away) when added the उपसर्ग has the following different meanings:—प्रहृ = to strike, आहृ = to eat, संहृ = to contract, विहृ = to sport, परिहृ = to avoid etc.

The following are the 20 उपसर्गs commonly prefixed to the roots and their meanings:—

	उपसर्गाः	धातवः	Verbs with उपसर्गाः
1.	अति beyond, over	क्रम् to go	अतिक्रामति goes beyond
2.	अधि over, above	गम् to go	अधिगच्छति goes up
3.	अनु after, behind	कृ to do	अनुकरोति imitates
4.	अप away from	नी to lead	अपनयति takes away
5.	अपि (sometimes पि, war to)	धा to hold	अपिदधाति covers

	उपसर्गाः	धातवः	Verbs with उपसर्गाः
6.	अभि towards	गम् to go	अभिगच्छति goes after
7.	अव away, down	मन् to think	अवमन्यते- disrespects
8	आ upto	गम् to go	आगच्छति comes
9.	उत् उद्, upon	गम् to go	उद्गच्छति goes up
10	उप towards	कृ to do	उपकरोति obliges
11	दुस-दुर् bad, hard to be done	चर् to move	दुराचरति acts badly
12	नि in, into, great etc.	दिश् to go	निर्दिशति commands
13.	निस्—निर् out of, away, from	गम् to go	निर्गच्छति goes out
14.	परा opposed to	जि to conquer	पराजयते defeats
15.	परि all round. about	धा to hold	परिदधाति places all round
16	प्र much, forth	हृ to take away	प्रहरति strikes
17.	प्रति in opposition to	कृ to do	प्रतिकरोति acts in opposite
18.	वि reverse to, separate from	क्री to buy	विक्रीणाति sells
19.	सम् together with, full	हृ to take away	संहरति destroys
20.	सु well	कृ to do	सुकरोति does well

Note·—Two or more of the above prepositions may also be combined and prefixed. e.g. अभि + नि + विश् = अभिनिविशते = to enter into with resolution; सम् + उप + आ + गम् = समुपागच्छति = to come into close contact.

The following six are उपसर्गसमानाकाराणि अव्ययानि:—

	उपसर्गाः	धातवः	Verbs with उपसर्गाः
1.	अन्तर् within, away, etc.	भू to be	अन्तर्भवति is within
2.	आविः out of, up	भू to be	आविर्भवति appears
3.	तिरस् dis-appearance	धा to hold	तिरोधत्ते dis-appears
4.	अस्तं away, down	गम् to go	अस्तं गच्छति goes down, sets
5.	अलं well	कृ to do	अलंकरोति decorates
6.	ऊरी assert	कृ to do	ऊरीकरोति accepts

कर्तृपदैः सह क्रियापदस्य प्रयोगः—

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र. पु.	सः भवति	तौ भवतः	ते भवन्ति
म. पु.	त्वं भवसि	युवां भवथः	यूयं भवथ
उ. पु.	अहं भवामि	आवां भवावः	वयं भवामः

उत्तमपुरुषस्य अस्मच्छब्दार्थः कर्ता

मध्यमपुरुषस्य युष्मच्छब्दार्थः कर्ता

प्रथमपुरुषस्य अस्मदर्थात्, युष्मदर्थात् च अन्यः कर्ता i e , सः, रामः, भवान् etc.

एवम् अन्येषु लकारेषु अपि द्रष्टव्यम् ॥

प्रथमगणः—भ्वादिः (1st Conjugation)

सत्तार्थकः 'भू' (भव्) to be—अकर्मकः—परस्मैपदी

१. (लट् वर्तमानार्थकः) Present Tense.

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.	भवति[1]	भवतः	भवन्ति
म.	भवसि	भवथः	भवथ
उ.	भवामि	भवावः	भवामः

२. लङ् (अनद्यतनभूतार्थकः) Imperfect (Past) Tense.

प्र.	अभवत्	अभवताम्	अभवन्
म.	अभवः	अभवतम्	अभवत
उ.	अभवम्	अभवाव	अभवाम

३. लोट् (विध्याशीः प्रार्थनार्थकः) Imperative Mood.

प्र.	भवतु, भवतात्	भवताम्	भवन्तु
म.	भव, भवतात्	भवतम्	भवत
उ.	भवानि	भवाव	भवाम

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः) Potential Mood.

प्र.	भवेत्	भवेताम्	भवेयुः
म.	भवेः	भवेतम्	भवेत
उ.	भवेयम्	भवेव	भवेम

---

[1] The Penultimate short and final vowel of the roots of this conjugation take Guna Substitute before the conjugational sign अ e.g., भू + अ (भो) भव्+अ=भव+ति=भवति ॥

लभ्=प्राप्तौ to get सकर्मकः[1]—आत्मनेपदी

लट्—Present Tense.

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.	लभते	लभेते	लभन्ते
म.	लभसे	लभेथे	लभध्वे
उ.	लभे	लभावहे	लभामहे

लङ्—Imperfect (Past) Tense.

प्र.	अलभत	अलभेताम्	अलभन्त
म.	अलभथाः	अलभेथाम्	अलभध्वम्
उ.	अलभे	अलभावहि	अलभामहि

लोट्—Imperative Mood.

प्र.	लभताम्	लभेताम्	लभन्ताम्
म.	लभस्व	लभेथाम्	लभध्वम्
उ.	लभै	लभावहै	लभामहै

विधिलिङ्—Potential Mood.

प्र.	लभेत	लभेयाताम्	लभेरन्
म.	लभेथाः	लभेयाथाम्	लभेध्वम्
उ.	लंभेय	लंभेवहि	लभेमहि

1. सकर्मकः = Root having an object—Transitive.
अकर्मकः = Root having no object—Intransitive.

प्रथमगणे—भ्वादौ (1st Conjugation) १०७९ धातवः सन्ति। तत्र प्रधानभूताः धातवः यथा—

परस्मैपदिनः

धातुः	अर्थः	लट् प्रथमपुरुष एकवचनम्
1. भू (भव्)	सत्तायाम् to be	भवति।
2. अञ्च्	पूजायाम् to worship	अञ्चति।
3. अट्	गतौ to wander	अटति।
4. अत्	सातत्यगमने to go constantly	अतति।
5. अर्च्	पूजायाम् to worship	अर्चति।
6. अर्ज्	अर्जने to earn	अर्जति।
7. अर्ह्	पूजायाम् to worship	अर्हति।
8. अ	रक्षणे to protect	अवति।
9. ईर्ष्य्	ईर्ष्यायाम् to envy	ईर्ष्यति।
10. ऋ (ऋच्छ्)	गतौ to go	ऋच्छति।
11. एज्	कम्पने to shake	एजति।
12. काङ्क्ष्	इच्छायाम् to desire	काङ्क्षति।
13. कूज्	अव्यक्ते शब्दे to hum	कूजति।
14. कृष् (कर्ष्)	विलेखने to plough	कर्षति।
15. क्रुश् (क्रोश्)	आह्वाने रोदने च to call-out	क्रोशति।
16. क्रन्द्	रोदने to cry	क्रन्दति।
17. क्रम्	पादविक्षेपे to walk	क्रामति।

क्रम्, क्लम्, त्रस्, and लष् belong to the 1st and 4th conjugations. The penultimate अ of क्रम् and क्लम् is lengthened in paras. and not in Atmane e.g, क्रामति, क्राम्यति, आक्रमते, क्लामति, क्लाम्यति, क्लाम्यते ॥

धातुः	अर्थः	लट् प्र. पु. ए.
18. क्रीड्	विहारे to play	क्रीडति ।
19. क्लम्	ग्लानौ to be fatigued	क्लामति ।
20. क्वण्	शब्दे to hum	क्वणति ।
21. खाद्	भक्षणे to eat	खादति ।
22. खेल्	चलने to shake	खेलति ।
23. गद्	व्यक्तायां वाचि to speak	गदति ।
24. गम् (गच्छ्)	गतौ to go	गच्छति ।
25. गर्ज्	शब्दे to roar	गर्जति ।
26. गुञ्ज्	अव्यक्ते शब्दे to hum	गुञ्जति ।
27. गुप्[1] (गोपाय्)	रक्षणे to protect	गोपायति ।
28. गुह्[2] (गूह्)	संवरणे to hide	गूहति ।
29. गै (गाय्)	शब्दे to sing	गायति ।
30. ग्लै (ग्लाय्)	हर्षक्षये to be fatigued	ग्लायति ।
31. घ्रा (जिघ्र)	घ्राणने to smell	जिघ्रति ।
32. चम्[3]	अदने to eat	चमति ।
33. चर्	गतिभक्षणयोः to go, to eat	चरति ।
34. चल्	कम्पने to shake	चलति ।

1. आय् is added on to this root before the conjugational sign. Hence it is conjugated as गोपायति ॥

2. The उ of this root is lengthened before the conjugational sign and it does not take guna. e g , गूहति ।

3. The penultimate अ of चम् with आ is lengthened e.g., आचामति ॥

धातुः	अर्थः	लट् प्र. पु. ए.
35. चुम्ब्	वक्त्रसंयोगे to kiss ,	चुम्बति ।
36. च्युत् (च्योत्)	आसेचने to flow	च्योतति ।
37. जप्	व्यक्तायां वाचि to utter in a low voice	जपति ।
38. जल्प्	प्रलपने to murmur	जल्पति ।
39. जि (जय्)	जये to conquer	जयति ।
40. जीव्	प्राणने to live	जीवति ।
41. ज्वल्	दीप्तौ to shine	ज्वलति ।
42. तप्	सन्तापे to make hot	तपति ।
43. तक्ष्[1]	तनूकरणे to shape	तक्षति ।
44. तॄ (तर्)	प्लवनतरणयोः to swim, to cross	तरति ।
45. त्यज्	हानौ to abandon	त्यजति ।
46. त्रस्	उद्वेगे to fear	त्रसति ।
47. दल्	विशरणे to break	दलति ।
48. दंश्	दशने to bite	दशति ।
49. दह्	भस्मीकरणे to burn	दहति ।
50. दा (यच्छ्)	दाने to give	यच्छति ।
51. दु	गतौ to go	दवति ।
52. दृश् (पश्य्)	प्रेक्षणे to see	पश्यति ।
53. द्रु (द्रव्)	गतौ to go	द्रवति ।
54. धे (धय्)	पाने to drink	धयति ।

[1] 'तक्ष्' when means "to pare" belongs to the 1st and the 5th conjugation. e. g., तक्षति, तक्ष्णोति ॥

धातु·	अर्थः	लट् प्र. पु. ए.
55. ध्यै (ध्याय्)	चिन्तायाम् to think off	ध्यायति ।
56. ध्मा (धम्)	शब्दाग्निसंयोगयोः to blow, to blow a fire	धमति ।
57. ध्वन्	शब्दे to sound	ध्वनति ।
58. नट्	नृत्तौ to dance	नटति ।
59. नद्	अव्यक्ते शब्दे to sound	नदति ।
60. नन्द्	समृद्धौ to be glad	नन्दति ।
61. नम्	प्रह्वत्वे to salute	नमति ।
62. नर्द्	शब्दे to roar	नर्दति ।
63. निन्द्	कुत्सायां to blame	निन्दति ।
64. पठ्	व्यक्तवागुच्चारणे	पठति ।
65. पत्	पतने गतौ च	पतति ।
66. पा (पिब्)	पाने to drink	पिबति ।
67 फल्	निष्पत्तौ to bear	फलति ।
68. फुल्ल्	विकसने to expand	फुल्लति ।
69. बुक्क्	भषणे to bark	बुक्कति ।
70. बुध् (बोध्)	अवगमने to make known	बोधति ।
71. भण्	शब्दे to speak	भणति ।
72. भ्रम्	चलने to roam	भ्रमति ।
73 मील्	निमेषणे to close eyes	मीलति ।
74 मूर्च्छ्	मोहसमुच्छ्राययोः to faint, to increase	मूर्च्छति ।
75. म्ना (मन्)	अभ्यासे to remember	मनति ।
76. म्लै (म्लाय्)	हर्षक्षये to be fatigued	म्लायति ।

धातुः	अर्थः	लट् प्र. पु. ए.
77. यम्[1] (यच्छ्)	उपरमे to stop	यच्छति ।
78. रट्	परिभाषणे to shout	रटति ।
79. रक्ष्	पालने to protect	रक्षति ।
80. रुह् (रोह्)	बीजजन्मनि to grow	रोहति ।
81. लप्	व्यक्तायां वाचि to speak	लपति ।
82. लष्	इच्छायाम् to wish	लषति ।
83. लस्	कान्तौ to shine	लसति ।
84. लुट् (लुण्ठ्)	स्तेये to steal	लुण्ठति ।
85. वद्	व्यक्तायां वाचि to speak	वदति ।
86. वम्	उद्गिरणे to vomit	वमति ।
87. वाञ्छ्	काङ्क्षायां to wish	वाञ्छति ।
88. वृष् (वर्ष्)	सेचने to rain	वर्षति ।
89. व्रज्	गतौ to go	व्रजति ।
90. शंस्	स्तुतौ to praise	शंसति ।
91. शुच् (शोच्)	शोके to grieve for	शोचति ।
92. श्रु[2] (शृ)	श्रवणे to hear	शृणोति ।
93. सेध्	गत्याम् to go	सेधति ।
94. सृ[3] (सर्)	गतौ to move	सरति ।
95. सृ (धाव्)	गतौ to run	धावति ।

1. This root is generally used with नि । e. g नियच्छति, नियमयति, नियमनम् etc.

2. Though 'श्रु' belongs to the 1st conjugation, it is to be conjugated like तन् (8th conjugation).

3. सृ substitutes धाव् for itself in the sense of to run. Hence धावति=runs, सरति=moves.

धातु·	अर्थः	लट् प्र. पु. ए.
96. सृ (सर्)	गतौ to go	सर्पति ।
97. स्खल्	सञ्चलने to stumble	स्खलति ।
98. स्था (तिष्ठ्)	गतिनिवृत्तौ to stand	तिष्ठति ।
99. स्मृ (स्मर्)	चिन्तायाम् to remember	स्मरति ।
100. स्रु (स्रव्)	गतौ to go	स्रवति ।
101. हस्	हसने to laugh	हसति ।
102. क्षर्	सञ्चलने to flow	क्षरति ।

।। आत्मनेपदिनः ।।

103. अय्	गतौ to go	अयते ।
104. ईह्	इच्छायाम् to wish	ईहते ।
105. ईक्ष्	दर्शने to see	ईक्षते ।
106. ऊह्	वितर्के to guess	ऊहते ।
107. एध्	वृद्धौ to grow	एधते ।
108. कत्थ्	श्लाघायाम् to boast	कत्थते ।
109. कम्[1] (कामय्)	कान्तौ to love	कामयते ।
110. क्लृप् (कल्प्)	सामर्थ्ये to be able	कल्पते ।
111. गर्ह्	कुत्सायाम् to blame	गर्हते ।
112. गाह्	विलोडने to penetrate	गाहते ।
113. ग्रस्	अदने to eat	ग्रसते ।
114. घट्	चेष्टायाम् to take place	घटते ।
115. चेष्ट्	चेष्टने to move about	चेष्टते ।
116 जृम्भ्	गात्रविनामे to yawn	जृम्भते ।
117. डी (डय्)	विहायसा गतौ to fly	डयते ।

1. अय् is added on to this root before the conjugational sign. e g. कामयते ॥

धातुः	अर्थः	लट्. प्र. पु. ए.
117. त्रप्	लज्जायाम् to be ashamed	त्रपते ।
118. त्रै (त्राय्)	पालने to defend from	त्रायते ।
119. त्वर्	सम्भ्रमे to make haste	त्वरते ।
120. दय्	प्रसादे to sympathise with	दयते ।
121. द्युत् (द्योत्)	दीप्तौ to shine	द्योतते ।
122. प्रथ्	प्रख्याने to become well known	प्रथते ।
123. बाध्	विलोडने to trouble	बाधते ।
124. भाष्	व्यक्तायां वाचि to speak	भाषते ।
125. भास्	दीप्तौ to shine	भासते ।
126. भिक्ष्	याच्ञायां to beg for	भिक्षते ।
127. भ्राज्	दीप्तौ to shine	भ्राजते ।
128. मुद् (मोद्)	हर्षे to be glad	मोदते ।
129. यत्	प्रयत्ने to try	यतते ।
130. रभ्	(generally with आ) राभस्ये to begin	आरभते ।
131. रम्	क्रीडायाम् to sport	रमते ।
132. रुच् (रोच्)	दीप्तौ to be pleased with	[illegible] ।
133 लङ्घ्	गतौ to transgress	लङ्घते ।
134 लभ्	प्राप्तौ to get	लभते ।
135. लोक्	दर्शने to look at	लोकते ।
136 वन्द्	अभिवादने to salute	वन्दते ।
137. वल्	सञ्चलने to move	वलते ।
138. वृत् (वर्त्)	वर्तने to be	वर्तते ।
139. वृध् (वर्ध्)	वृद्धौ to grow	वर्धते ।
140. वेप्	कम्पने to tremble	वेपते ।
141. वेष्ट्	वेष्टने to surround	वेष्टते ।

धातुः	अर्थः	लट्. प्र. पु. ए.
142. व्यथ्	भयचलनयोः to be afraid	व्यथते ।
143. शङ्क्	शङ्कायाम् to doubt	शङ्कते. ।
144. शिक्ष्	विद्योपादने to learn	शिक्षते ।
145. शुभ् (शोभ्)	दीप्तौ to shine	शोभते ।
146. श्लाघ्	कत्थने to praise	श्लाघते ।
147. सह्	मर्षणे to endure	सहते ।
148. सूद्	हिंसायाम् to hur	सूदते ।
149. स्पन्द्	किञ्चिच्चलने to throb	स्पन्दते ।
150. स्पर्ध्	संघर्षे to challenge	स्पर्धते ।
151. स्यन्द्	प्रस्रवणे to flow	स्यन्दते ।
152. स्वज्	परिष्वङ्गे to embrace	स्वजते ।
153. स्वद्	आस्वादे to be liked	स्वदते ।
154. स्रंस्	अवस्रंसने to sink	स्रंसते ।
155. ह्लाद्	सुखे to be glad	ह्लादते ।
156. क्षम्	सहने to forgive, to suffer	क्षमते ।

॥ उभयपदिनः ॥

		परस्मै	आत्मने
157. खन्	अवदारणे to dig off	खनति,	खनते ।
158. नी (नय्)	प्रापणे to lead, to carry	नयति,	नयते ।
159. धा गति शुध्योः	to go, to wash	धावति,	धावते ।
160. पच्	पाके to cook	पचति,	पचते ।
161. बुध् (बोध्)	बोधने to know	बोधति,	बोधते ।
162. भज्	सेवायाम् to resort to	भजति,	भजते ।
163. भृ (भर्)	भरणे to support to bear	भरति,	भरते ।
164. यज्	देवपूजायाम् to, sacrifice	यजति,	यजते ।

धातुः	अर्थः	परस्मै.	आत्मने.
165. याच्	याच्ञायाम् to beg	याचति,	याचते
166. राज्	दीप्तौ to shine	राजति,	राजते ।
167. वप्	बीजसन्ताने to sow	वपति,	वपते ।
168. वह्	प्रापणे to lead	वहति,	वहते
169. वे (वय्)	तन्तुसन्ताने to weave	वयति,	वयते ।
170. शप्	आक्रोशे to curse	शपति,	शपते ।
171. श्रि (श्रय्)	सेवायाम् to resort to	श्रयति,	श्रयते ।
172. हृ (हर्)	हरणे to take away	हरति,	हरते
173. ह्वे (ह्वय्)	आह्वाने to call	ह्वयति,	ह्वयते

॥ इति भ्वादिः ॥

षष्ठगणः तुदादिः (6th Conjugation)

तुद् व्यथने to wound - सकर्मकः —उभयपदी

॥ परस्मैपदे ॥

लट्	प्र. पु.	तुदति	तुदतः	तुदन्ति
लङ्	प्र. पु.	अतुदत्	अतुदताम्	अतुदन्
लोट्	प्र. पु.	तुदतु, तुदतात्	तुदताम्	तुदन्तु
लिङ्	प्र. पु.	तुदेत्	तुदेताम्	तुदेयुः

इत्यादि 'भू' धातुवत् (Page 9) रूपाणि ।

1. The penultimate vowel remains unchanged before this conjugational sign. i.e. तुद्+अ+ति=तुदति ॥

॥ आत्मनेपदं ॥

लट्	प्र. पु.	तुदते	तुदेते	तुदन्ते
लङ्	प्र. पु.	अतुदत	अतुदेताम्	अतुदन्त
लोट्	प्र. पु.	तुदताम्	तुदेताम्	तुदन्ताम्
लिङ्	प्र. पु.	तुदेत	तुदेयाताम्	तुदेरन्

इत्यादि । 'लभ्' धातुवत् (Page 10) रूपाणि ॥

षष्ठगणे—तुदादौ (6th Conjugation) १५७ धातवः सन्ति । तत्र प्रधानभूताः धातवः यथा—

परस्मैपदिनः

धातुः	अर्थः	लट् प्र. पु. ए.
1. इष् (इच्छ्)	इच्छायाम् to wish	इच्छति ।
2. उज्झ्	उत्सर्गे to abandon	उज्झति ।
3. कृत (कृन्त्)	छेदने to cut	कृन्तति ।
4. कॄ (किर्)	विक्षेपे to scatter	किरति ।
5 गुम्फ्	ग्रन्थे to compose	गुम्फति ।
6. [1] गॄ (गिर्)	निगरणे to swallow	गिरति ।
7. चर्च्	परिभाषणे to abuse	चर्चति ।
8 त्रुट्*	छेदने to break	त्रुटति ।
9. धृ (धुव्)	गतिस्थैर्ययोः to move	धुवति ।
10. प्रच्छ (पृच्छ्)	ज्ञीप्सायाम् to ask	पृच्छति ।

1 The final ऋ is changed to इर् ॥

* त्रुट् belongs to the 4th conjugation also. i.e. त्रुट्यति ॥

धातुः	अर्थः	लट् प्र. पु. ए.
11. मस्ज् (मज्ज्)	शुद्धौ to bathe	मज्जति।
12. मृश्	आमर्शने to touch	मृशति।
13. रुज्	भङ्गे to break	रुजति।
14. लिख्	अक्षरविन्यासे to write	लिखति।
15. विश्	प्रवेशने to enter	विशति।
16 सद् (सीद)	विशरणगत्यवसादनेषु to sink	सीदति।
17. सृज्	विसर्गे to create	सृजति।
18. स्पृश्	संस्पर्शने to touch	स्पृशति।
19. स्फुट्	विकसने to blossom	स्फुटति।
20. स्फुर्	सञ्चलने to throb	स्फुरति।

॥ आत्मनेपदिनः ॥

21 जुष्	प्रीतिसेवनयोः to be pleased	जुषते।
22 दृ (द्रिय्)	(generally with आ) आदरे to respect	आद्रियते।
23. मृ (म्रिय्)[1]	प्राणत्यागे to die	म्रियते।
24. विज्	भयचलनयोः to fear, to shake	विजते।

॥ उभयपदिनः ॥

		परस्मै	आत्मने
25. तुद्	व्यथने to pain	तुदति,	तुदते।
26 क्षिप्[2]	प्रेरणे to throw	क्षिपति,	क्षिपते।
27. दिश्	अतिसर्जने to grant	दिशति,	दिशते।
28. नुद्	प्रेरणे to push	नुदति,	नुदते।
29. मुच् (मुञ्च्)	मोचने to release	मुञ्चति,	मुञ्चते।

1. मृ is परस्मैपदी in the लिट्, लुट् लृङ् and सन्नन्त ॥
2. क्षिप् belongs to the 4th conjugation also क्षिप्यति ॥

धातुः	अर्थः	परस्मै.	आत्मने.
30 मिल्	सङ्गमे to meet together	मिलति,	मिलते ।
31. लिप् (लिम्प्)	उपदेहे to anoint	लिम्पति,	लिम्पते ।
32. लुप् (लुम्प्)	छेदने to cut	लुम्पति,	लुम्पते ।
33. विद् (विन्द्)	लाभे to get	विन्दति,	विन्दते ।
34. सिच् (सिञ्च्)	सेचने to sprinkle	सिञ्चति,	सिञ्चते ।
35. कृष्	विलेखने to plough	कृषति,	कृषते ।

॥ इति तुदादिः ॥

चतुर्थगणः दिवादिः (4th Conjugation)

दिव् (दीव्) क्रीडायाम् to play अकर्मकः—परस्मैपदी

लट्	प्र. पु.	दीव्यति	दीव्यतः	दीव्यन्ति
लङ्	प्र. पु.	अदीव्यत्	अदीव्ताम्	अदीव्यन्
लोट्	प्र. पु.	दीव्यतु, दीव्यतात्	दीव्यताम्	दीव्यन्तु
लिङ्	प्र. पु.	दीव्येत्	दीव्येताम्	दीव्येयुः

इत्यादि 'भू' धातुवत् (Page 9) रूपाणि ।

॥ दीप् (दीप्तौ to shine अकर्मकः—आत्मनेपदी ॥

लट्	प्र. पु.	दीप्यते	दीप्येते	दीप्यन्ते
लङ्	प्र. पु.	अदीप्यत	अदीप्येताम्	अदीप्यन्त
लोट्	प्र. पु.	दीप्यताम्	दीप्येताम्	दीप्यन्ताम्
लिङ्	प्र. पु.	दीप्येत	दीप्येयाताम्	दीप्येरन्

इत्यादि । 'लभ्' धातुवत् (Page 10) रूपाणि ॥

धातवः सन्ति । तत्र प्रधानभूताः धातवः यथा—

परस्मैपदिनः

धातुः	अर्थः	लट् प्र. पु. ए.
1. दिव् (दीव्)	क्रीडायाम् to play	दीव्यति ।
2. अस्	क्षेपणे to throw	अस्यति ।
3. कुप्	क्रोधे to be angry	कुप्यति ।
4 क्रुध्	क्रोधे to be angry	क्रुध्यति ।
5. क्लम् (क्लाम्)	ग्लानौ to be fatigued	क्लाम्यति ।
6. क्लिद्	आर्द्रीभावे to become wet	क्लिद्यति ।
7. जॄ (जीर्)	वयोहानौ to grow old	जीर्यति ।
8. तम् (ताम्)	काङ्क्षायाम् to be anxious	ताम्यति ।
9. तुष्	तुष्टौ to be pleased	तुष्यति ।
10. तृप्	तृप्तौ to be pleased	तृप्यति ।
11. दुष्	वैकृत्ये to become impure	दुष्यति ।
12. दृप्	हर्षमोहनयोः to be proud	दृप्यति ।
13 द्रुह्	जिघांसायाम् to hurt	द्रुह्यति ।
14. नश्	अदर्शने to disappear	नश्यति ।
15. नृत्	गात्रविक्षेपे to dance	नृत्यति ।
16. पुष्	पुष्टौ to nourish	पुष्यति ।
17. पुष्प्	विकसने to blossom	पुष्प्यति ।
18. प्लुष्	दाहे to burn	प्लुष्यति ।
19 भ्रम् (भ्राम्*)	अनवस्थाने to roam	भ्रम्यति-भ्राम्यति ।
20. मद् (माद्)	हर्षे to be glad	माद्यति ।

---

* The अ of भ्रम् is optionally lengthened, भ्रम् belongs to 1st conj. also भ्रमति ॥

धातुः	अर्थः	लट् प्र. पु. ए.
21. मुह्	वैचित्ये to swoon	मुह्यति ।
22. यस्	प्रयत्ने to try	यस्यति ।
23. लुभ्	गार्ध्ये to desire eagerly	लुभ्यति ।
24. व्यध्	ताडने to strike	विध्यति ।
25. शम् (शाम्)	उपशमे to stop	शाम्यति ।
26. शुध्	शौचे to become pure	शुध्यति ।
27. शुष्	शोषणे to become dry	शुष्यति ।
28. श्लिष्	आलिङ्गने to embrace	श्लिष्यति ।
29. श्रम् (श्राम्)	खेदे तपसि च to take pains	श्राम्यति ।
30. ष्ठिव्[1] (ष्ठीव्)	निरसने to spit	ष्ठीव्यति ।
31. षिध्	संराद्धौ to be fulfilled	सिध्यति ।
32. षिव् (सीव्)	तन्तुसन्ताने to sew	सीव्यति ।
33. ष्विद्	गात्रप्रक्षरणे to prespire	स्विद्यति ।
34. हृष्	तुष्टौ to be glad	हृष्यति ।
35. ष्णिह्	तुष्टौ to be fond of	स्निह्यति ।
36. क्षम् (क्षाम्)[2]	सहने to pardon	क्षाम्यति ।
37. क्षुभ्[3]	सञ्चलने to shake	क्षुभ्यति ।

॥ आत्मनेपदिनः ॥

38. क्लिश्	उपतापे to be afflicted	क्लिश्यते ।
39. खिद्	दैन्ये to be distressed	खिद्यते ।

---

1. ष्ठिव् belongs to the 1st conj. also. e.g. ष्ठीवति ॥

2. क्षम belongs to the 1st conj. also e.g. क्षमते ॥

3. The root क्षुभ् belongs to the 1st and 9th conjugations also. क्षोभते—1st conj. क्षुभ्नाति—9th conj.

	धातुः	अर्थः	लट् प्र. पु. ए.
40.	जन् (जा)	प्रादुर्भावे to be born	जायते ।
41.	दीप्	दीप्तौ to shine	दीप्यते ।
42.	दू	परितापे to suffer pain	दूयते ।
43.	पूर्	आप्यायने to be full	पूर्यते ।
44.	प्री	प्रीतौ to be satisfied	प्रीयते ।
45.	बुध्	अवगमने to know	बुध्यते ।
46.	मन्	ज्ञाने to think	मन्यते ।
47.	युज्	समाधौ to meditate	युज्यते ।
48.	युध्	संप्रहारे to fight	युध्यते ।
49.	ली	श्लेषणे to adhere to	लीयते ।
50.	विद्	सत्तायाम् to be	विद्यते ।
51.	सू	प्राणिप्रसवे to bring forth	सूयते ।

॥ उभयपदिनः ॥

			परस्मै.	आत्मने.
52.	नह्	बन्धने to tie	नह्यति	नह्यते ।
53.	रञ्ज् (रज्)	रागे to be dyed	रज्यति,	रज्यते ।
54.	मृष्	तितिक्षायाम् to bear	मृष्यति,	मृष्यते ।

॥ इति दिवादिगणः ॥

दशमगणः—चुरादिः (10th Conjugation)

1. Roots of the 10th Conjugation take अय in the conjugational Tenses and Moods before the terminations are applied e.g. चुर् + अय + ति ॥

2. The penultrimate short vowel, except in certain roots, takes its गुण substitute. e.g. चुर् (चोर्) + अय + ति = चोरयति । Exception कृप् = कृपयति ॥

3. The ending vowels and the penultimate अ, except in certain roots substitute their वृद्धि before the अय of the 10th Conj. e.g. क्षल् (क्षाल्) + अय + ति = क्षालयति । Exception कथ् = कथयति ॥

4. There are only 2 sets of roots in this conjugation viz., आत्मनेपदिनः and उभयपदिनः ॥

॥ चुर् स्तेये to steal सकर्मकः—उभयपदी ॥

॥ परस्मैपदे रूपाणि ॥

लट्	प्र. पु.	चोरयति	चोरयतः	चोरयन्ति
लङ्	प्र. पु.	अचोरयत्	अचोरयताम्	अचोरयन्
लोट्	प्र. पु.	चोरयतु, चोरयतात्	चोरयताम्	चोरयन्तु
लिङ्	प्र. पु.	चोरयेत्	चोरयेताम्	चोरयेयुः

इत्यादि 'भू' धातुवत् (Page 9) रूपाणि ॥

॥ आत्मनेपदे रूपाणि ॥

लट्	प्र. पु.	चोरयते	चोरयेते	चोरयन्ते
लङ्	प्र. पु.	अचोरयत	अचोरयेताम्	अचोरयन्त
लोट्	प्र. पु.	चोरयताम्	चोरयेताम्	चोरयन्ताम्
लिङ्	प्र. पु.	चोरयेत	चोरयेयाताम्	चोरयेरन्

इत्यादि 'लभ्' धातुवत् (Page 10) रूपाणि ।

दशमगणे चुरादौ (10th Conjugation) ४१०

धातवः सन्ति । तत्र प्रधानभूताः धातवः यथा—

॥ आत्मनेपदिनः ॥

	धातुः	अर्थः	लट् प्र. पु. ए.
1.	अर्थ्	याच्ञायाम् to request	अर्थयते ।
2.	कुत्स्	अवक्षेपणे to abuse	कुत्सयते ।
3.	चित् (चेत्)	सञ्चेतने to perceive	चेतयते ।
4.	तर्ज्	तर्जने to threaten	तर्जयते ।
5.	दश् (दंश्) *	दशने to bite	दंशयते ।
6.	भर्त्स्	भर्त्सने to threaten	भर्त्सयते ।
7.	भू *	प्राप्तौ to obtain	भावयते ।
8.	मन्त्र्	गुप्तपरिभाषणे to consult	मन्त्रयते ।
9.	मृग् *	अन्वेषणे to seek, to hunt	मृगयते ।
10.	विद्	चेतनाख्याननिवासेषु to tell, etc.	वेदयते ।
11.	स्पश्	संश्लेषणे to embrace	स्पाशयते ।
12.	लल	ईप्सायाम् to fondle	लालयते ।

॥ उभयपदिनः ॥

			परस्मै.	आत्मने
13.	चुर्	स्तेये to steal	चोरयति	ते
14.	अङ्क्	पदे लक्षणे च to mark	अङ्कयति	ते
15.	अर्ह् *	पूजायां to worship	अर्हयति	ते

* दश् and अर्ह् belong to 1st conjugation also in परस्मैपद—दशति, अर्हति ॥

* भू (प्राप्तौ), takes optionally the 1st conj. sign. also—भवते ॥

* मृग् belongs to the 4th conj. also—मृग्यते ॥

धातुः	अर्थः	परस्मै.	आत्मने.
16. अवधीर्	अवधीरणे to disrespect	अवधीरयति	ते
17. ईर् ※	क्षेपे to throw	ईरयति	ते
18. कथ्	वाक्यप्रबन्धे to tell	कथयति	ते
19. कर्ण्	भेदने to bore	कर्णयति	ते
	(कर्ण् with आ to hear)	आकर्णयति	ते
20. कल्	गतौ संख्याने च to count	कलयति	ते
21. कृत् (कीर्त्)	संशब्दने to celebrate	कीर्तयति	ते
22. कृप	सामर्थ्ये to be able	कृपयति	ते
23. क्रन्द	(generally with आ) क्रन्द-सातत्ये to cry continually	क्रन्दयति	ते
24. क्षप्	प्रेरणे to throw, to cast	क्षपयति	ते
25. क्षल्	शौचकर्मणि to wash	क्षालयति	ते
26. खण्ड्	भेदने to break into pieces	खण्डयति	ते
27. गण्	संख्याने to count	गणयति	ते
28. गर्ज्	शब्दे to roar	गर्जयति	ते
29. गर्ह् ※	विनिन्दने to blame	गर्हयति	ते
30. गवेष्	मार्गणे to seek	गवेषयति	ते
31. गुण्ठ्	वेष्टने to cover	गुण्ठयति	ते
32. गुप्	भाषायां भासने च to conceal	गोपयति	ते
33. ग्रन्थ् ※	बन्धने, सन्दर्भे च to arrange	ग्रन्थयति	ते
34. ग्रस्	ग्रहणे to take, to devour	ग्रसयति	ते
35. घुष् ※	विशब्दने to proclaim	घोषयति	ते

※ ईर, ग्रन्थ and घुष् belong to 1st conj. also in परस्मैपद e.g. ईरति, ग्रन्थति, घोषति ॥

※ गर्ह ※belongs to 1st conj. also in आत्म—गर्हते ॥

धातु:	अर्थ:	परस्मै.	आत्मने.
36. चित्र्	चित्रकरणे to paint	चित्रयति	ते
37. चिन्त्	स्मृत्याम् to think	चिन्तयति	ते
38. चिह्न	लक्षणे (सौत्रधातुः) to mark	चिह्नयति	ते
39. चुद्	संचोदने to push on	चोदयति	ते
40. चूर्ण्	प्रेरणे संकोचने च to crush	चूर्णयति	ते
41. छद्	आवरणे to conceal	छादयति	ते
42. छर्द्	वमने to vomit	छर्दयति	ते
43. ज्ञप्	ज्ञाने ज्ञापने च to know	ज्ञापयति	ते
44. ज्ञा (ज्ञाप्)	(generally with आ नियोगे to command	आज्ञापयति	ते
45. तड्	आघाते to strike, to beat	ताडयति	ते
46. तर्क्	वितर्के to guess	तर्कयति	ते
47. तप्*	सन्तापे to heat, to burn	तापयति	ते
48. तुल्	उन्माने to weigh	तोलयति	ते
49. तृप्	तृप्तौ to please	तर्पयति	ते
50 दण्ड्	दमने to punish	दण्डयति	ते
51. धू (धून्)	कंपने to shake, to agitate	धूनयति	ते
52. धृ	धारणे to hold. to owe	धारयति	ते
53. ध्वन्	अव्यक्ते शब्दे to sound	ध्वनयति	ते
54. पार्	कर्मसमाप्तौ to accomplish	पारयति	ते
55. पाल्	रक्षणे to protect	पालयति	ते
56. पीड्	अवगाहने to afflict	पीडयति	ते
57. पूज्	पूजायां to worship	पूजयति	ते

* तप् belongs to 1st conj. also in परस्मैपद—तपति ॥

	धातुः	अर्थः	परस्मै.	आत्मने.
58	पूर्*	आप्यायने to cover	पूरयति	ते
59.	पॄ*	पूरणे to fill	पारयति	ते
60	प्रथ्*	प्रख्याने to proclaim	प्रथयति	ते
61	प्री* (प्रीण्)	तर्पणे to please	प्रीणयति	ते
62.	भक्ष्	अदने to eat	भक्षयति	ते
63.	भू	अवकल्कने to be purified	भावयति	ते
64.	भूष्*	अलङ्कारे to adorn	भूषयति	ते
65.	मण्ड्	भूषायां to adorn	मण्डयति	ते
66.	मन्त्र्	गुप्तभाषणे to consult	मन्त्रयति	ते
67.	मह्*	पूजायाम् to worship	महयति	ते
68.	मान्*	पूजायाम् to worship	मानयति	ते
69.	मार्ग्*	अन्वेषणे to seek	मार्गयति	ते
70	मार्ज्	शुद्धौ to purify	मार्जयति	ते
71.	मिश्र	सम्पर्के to mix	मिश्रयति	ते
72.	मुच्	प्रमोचने to set free	मोचयति	ते
73.	मुद्	संसर्गे to mix	मोदयति	ते
74.	मूत्र्	प्रस्रवणे to discharge urine	मूत्रयति	ते
75.	मृज्	शौचे to wipe off	मार्जयति	ते

*पूर् belongs to 4th conj. also पूर्यते ॥

* प्रथ् belongs to 1st conj. also in आत्मने --प्रथते ॥

* प्री belongs to 1st conj. also in उभयपद

e.g. प्रयति—ते ॥

* पॄ, भूष्, मह्, मान्, मार्ग्, मूत्र्, and मृज् belong to 1st conj. also in परस्मै e.g. परति, भूषति, महति, मानति, मार्गति, मूत्रति and मार्जति ॥

	धातुः	अर्थः	परस्मै.	आत्मने.
76.	मृष्	तितिक्षायाम् to forgive	मर्पयति	ते
77.	युज्*	संयमने to bind	योजयति	ते
78.	रच्	प्रतियत्ने to arrange	रचयति	ते
79.	रह्*	त्यागे to abandon	रहयति	ते
80.	रुष्	रोषे to be angry	रोषयति	ते
81.	रूप्	रूपक्रियायाम् to form	रूपयति	ते
82.	लक्ष्*	आलोचने to see, to look at	लक्षयति	ते
83.	लंघ्	सीमातिक्रमे to transgress	लंघयति	ते
84.	लोक्	दीप्तौ to shine	लोकयति	ते
85.	लोच्	दर्शने to see, to perceive	लोचयति	ते
86.	वच्*	परिभाषणे to speak	वाचयति	ते
87.	वर्ध्	पूरणे to fill	वर्धयति	ते
88.	वद्*	सन्देशवचने to inform	वादयति	ते
89.	वर्	ईप्सायाम् to desire	वरयति	ते
90.	वर्ण्	गुणवचने to describe	वर्णयति	ते
91.	वस्	निवासे to dwell	वसयति	ते
92.	वीज्	व्यजने to fan	वीजयति	ते
93.	वृ*	आवरणे to cover	वारयति	ते
94.	वृज्*	वर्जने to avoid	वर्जयति	ते
95.	व्यय्	वित्तसमुत्सर्गे to expend	व्यययति	ते

* युज्, रह्, वच् and वृज् belong to 1st conj. also in परस्मै e.g. योजति, रहति, वचति, वर्जति ॥

* लक्ष् belongs to 1st conj. in आत्म. लक्षते ॥

* वद्, वृ and व्यय् belong to 1st conj. also in उभयपद. e.g, वदति—ते, वरति—ते, व्ययति—ते ॥

	धातुः	अर्थः	परस्मै.	आत्मने.
96.	व्रण्*	गात्रविचूर्णने to wound	व्रणयति	ते
97.	शब्द्	आविष्कारे to utter	शब्दयति	ते
98.	शील्*	उपधारणे to exercise	शीलयति	ते
99.	श्रण्*	(generally with वि)दाने to give	विश्राणयति	ते
100.	श्लिष्	श्लेषणे to embrace	श्लेषयति	ते
101.	सभाज्	प्रीतिदर्शनयोः to please	सभाजयति	ते
102.	सह्	मर्षणे to forbear	साहयति	ते
103.	सान्त्व्	सामप्रयोगे to console	सान्त्वयति	ते
104.	सुख्	सुखक्रियायां to make happy	सुखयति	ते
105.	सूद्	क्षरणे to wound	सूदयति	ते
106.	स्पृह्	ईप्सायाम् to wish	स्पृहयति	ते
107.	स्फुट्	भेदने to burst	स्फोटयति	ते
108.	स्वाद्	आस्वादे to taste	स्वादयति	ते
109.	हिंस्	हिंसायाम् to injure	हिंसयति	ते
110.	ह्लप्	व्यक्तायां वाचि to speak	ह्लपयति	ते

॥ इति चुरादिगणः ॥

---

*व्रण् and श्रण् belong to 1st conj. also in परस्मै. e.g, व्रणति, शीलति and श्रणति ॥

द्वितीयगणः—अदादिः (2nd Conjugation)

1. Roots of the 2nd conjugation take no **विकरणप्रत्यय**; therefore terminations are directly applied to them.

2. The base of the roots of the 2nd group of conjugational classes undergoes many modifications. Hence they are conjugated separately.

द्वितीयगणे—अदादौ (2nd Conjugation)

७२ धातवः सन्ति । तत्र प्रधानभूताः धातवः यथा—

परस्मैपदिनः

धातुः	अर्थः	लट् प्र. पु. ए.
1. अद्	भक्षणे to eat	अत्ति ।
2. अन्	प्राणने to breathe	अनिति ।
3. अस्	भुवि to be	अस्ति ।
4. इ	गतौ to go	एति ।
5. क्ष्णु	तेजने to sharpen	क्ष्णौति ।
6. ख्या	प्रकथने to tell	ख्याति ।
7. चकास्	दीप्तौ to shine	चकास्ति ।
8. जागृ	निद्राक्षये to be awake	जागर्ति ।
9. दरिद्रा	दुर्गतौ to be poor	दरिद्राति ।
10. दा	लवने to cut	दाति ।
11. द्रा	लवने to cut	द्राति ।

धातुः	अर्थः	लट् प्र. पु. ए.
12. नु	स्तुतौ to praise	नौति ।
13. पा	रक्षणे to protect	पाति ।
14. प्रा	पूरणे to fill	प्राति ।
15. प्सा	भक्षणे to eat	प्साति ।
16. भा	दीप्तौ to shine	भाति ।
17. मा	माने to measure	माति ।
18. मृज्	शुद्धौ to cleanse	मार्ष्टि ।
19. या	प्रापणे to go	याति ।
20. यु	मिश्रणे to join	यौति ।
21. रा	दाने to give	राति ।
22. रु	शब्दे to cry	रौति—रवीति ।
23. रुद्	अश्रुविमोचने to cry	रोदिति ।
24. ला	आदाने to take	लाति
25. वच्[1]	परिभाषणे to speak	वक्ति ।
26. वा	गतिगंधनयोः to go, blow	वाति ।
27. विद्	ज्ञाने to know	वेत्ति, वेद ।
28. सास्	अनुशिष्टौ to rule	शास्ति ।
29. श्रा	पाके to cook	श्राति ।
30. श्वस्	प्राणने to breathe	श्वसिति ।
31. स्ना	शौचे to bathe	स्नाति ।
32. स्वप्	शये to sleep	स्वपिति ।
33. हन्	हिंसागत्योः to kill, to go	हन्ति ।

[1] वच् is उभयपदी in non-conjugational tenses.

॥ आत्मनेपदिनः ॥

	धातुः	अर्थः	लट् प्र. पु. ए.
34.	आस्	उपवेशने to sit	आस्ते ।
35.	इ (with अधि)	अध्ययने to study	अधीते ।
36.	ईड्	स्तुतौ to praise	ईट्टे ।
37.	ईश्	ऐश्वर्ये to rule, to command	ईष्टे ।
38.	चक्ष्	व्यक्तायां वाचि to speak	चष्टे ।
39.	वस्	आच्छादने to dress	वस्ते ।
40.	शास् (with आ)	इच्छायाम् to desire	आशास्ते ।
41.	शी	स्वप्ने to sleep	शेते ।
42.	सू	प्राणिप्रसवे to give birth to	सूते ।
43.	ह्नु	अपनयने to conceal	ह्नुते ।

॥ उभयपदिनः ॥

			परस्मै.	आत्मने.
44.	ऊर्णु	आच्छादने to cover	ऊर्णौति, ऊर्णोति	ऊर्णुते
45.	दिह्	उपचये to increasase	देग्धि—	दिग्धे
46.	दुह्	प्रपूरणे to milk	दोग्धि—	दुग्धे
47.	द्विष्	अप्रीतौ to hate	द्वेष्टि—	द्विष्टे
48.	ब्रू	व्यक्तायां वाचि to speak	ब्रवीति, आह	ब्रूते
49.	लिह्	आस्वादने to like	लेढि—	लीढे
50.	स्तु	स्तुतौ to praise	स्तौति, स्तवीति	स्तुते, स्तुवीते

॥ परस्मैपदिनः ॥

1. अद् भक्षणे to eat सकर्मकः

लट्—Present Tense

प्र.	अत्ति	अत्तः	अदन्ति
म.	अत्सि	अत्थः	अत्थ
उ.	अद्मि	अद्वः	अद्मः

लङ्—Imperfect Past Tense.

प्र.	आदत्	आत्ताम्	आदन्
म.	आदः	आत्तम्	आत्त
उ.	आदम्	आद्व	आद्म

लोट्—Imperative Mood.

प्र.	अत्तु—अत्तात्,	अत्ताम्	अदन्तु
म.	अद्धि—अत्तात्	अत्ताम्	अत्त
उ.	अदानि	अदाव	अदाम

विधिलिङ्—Potential Mood.

प्र.	अद्यात्	अद्याताम्	अद्युः
म.	अद्याः	अद्यातम्	अद्यात
उ.	अद्याम्	अद्याव	अद्याम

3. अस्—भुवि to be अकर्मकः—परस्मैपदी

लट्—Present Tense.

प्र.	अस्ति	स्तः	सन्ति
म.	असि	स्थः	स्थ
उ.	अस्मि	स्वः	स्मः

लङ्—Imperfect Past Tense.

प्र	आसीत्	आस्ताम्	आसन्
म	आसीः	आस्तम्	आस्त
उ	आसम्	आस्व	आस्म

लोट्—Imperative Mood.

प्र.	अस्तु - स्तात्,	स्ताम्	सन्तु
म.	एधि - स्तात्,	स्तम्	स्त
उ.	असानि	असाव	असाम

विधिलिङ्—Potential Mood.

प्र.	स्यात्	स्याताम्	स्युः
म.	स्याः	स्यातम्	स्यात
उ.	स्याम्	स्याव	स्याव

19. या प्रापणे to go सकर्मकः—परस्मैपदी

लट्—Present Tense.

प्र.	याति	यातः	यान्ति
म.	यासि	याथः	याथ
उ.	यामि	यावः	यामः

लङ्—Imperfect Past Tense.

प्र.	अयात्	अयाताम्	अयुः, अयान्
म.	अयाः	अयातम्	अयात
उ.	अयाम्	अयाव	अयाम

लोट्—Imperative Mood.

प्र.	यातु - यातात्,	याताम्	यान्तु
म.	याहि - यातात्,	यातम्	यात
उ.	यानि	याव	याम

विधिलिङ्—Potential Mood

प्र.	यायात्	यायाताम्	यायुः
म.	यायाः	यायातम्	यायात
उ.	यायाम्	यायाव	यायाम

एवं ६ ख्या, १० क्षा, ११ त्रा, १३ दा, १४ प्रा, १५ प्सा, १६ भा, १७ मा, २१ रा, २४ ला, २६ वा, २९ श्रा & ३१ स्ना धातूनां रूपाणि द्रष्टव्यानि ॥

4. इ गतौ to go—सकर्मकः—परस्मैपदी

लट्—Present Tense.

प्र.	एति	इतः	यन्ति
म.	एषि	इथः	इथ
उ.	एमि	इवः	इमः

लङ्—Imperfect Past Tense

प्र.	ऐत्	ऐताम्	आयन्
म.	ऐः	ऐतम्	ऐत
उ.	आयम्	ऐव	ऐम

लोट्—Imperative Mood.

प्र.	एतु - इतात्,	इताम्	यन्तु
म.	इहि - इतात्,	इतम्	इत
उ.	अयानि	अयाव	अयाम

विधिलिङ्—Potential Mood.

प्र.	इयात्	इयाताम्	इयुः
म.	इयाः	इयातम्	इयात
उ.	इयाम्	इयाव	इयाम

2. अन् प्राणने to breathe अकर्मकः—परस्मैपदी

लट्—Present Tense.

प्र.	अनिति	अनितः	अनन्ति
म.	अनिषि	अनिथः	अनिथ
उ.	अनिमि	अनिवः	अनिमः

लङ्—Imperfect Past Tense.

प्र.	आनीत् - आनत्,	आनिताम्	आनन्
म.	आनीः - आनः,	आनितम्	आनित
उ.	आनम्	आनिव	आनिम

लोट्—Imperative Mood.

प्र.	अनितु - अनितात्,	अनिताम्	अनन्तु
म.	अनिहि - अनितात्,	अनितम्	अनित
उ.	अनानि	अनाव	अनाम

विधिलिङ्—Potential Mood.

प्र.	अन्यात्	अन्याताम्	अन्युः
म.	अन्याः	अन्यातम्	अन्यात
उ.	अन्याम्	अन्याव	अन्याम

एवं ३० श्वस्, ३२ स्वप् धात्वोः रूपाणि द्रष्टव्यानि ॥

23. रुद् अश्रुविमोचने to cry अकर्मकः—परस्मैपदी

लट्—Present Tense.

प्र.	रोदिति	रुदितः	रुदन्ति
म.	रोदिषि	रुदिथः	रुदिथ
उ.	रोदिमि	रुदिवः	रुदिमः

लङ्—Imperfect Past Tense.

प्र.	अरोदीत् - अरोदत्,	अरुदिताम्	अरुदन्
म.	अरोदीः - अरोदः,	अरुदितम्	अरुदित
उ.	अरोदम्	अरुदिव	अरुदिम

लोट्—Imperative Mood.

प्र.	रोदितु - रुदितात्,	रुदिताम्	रुदन्तु
म.	रुदिहि - रुदितात्,	रुदितम्	रुदित
उ.	रोदानि	रोदाव	रोदाम

विधिलिङ्—Potential Mood

प्र.	रुद्यात्	रुद्याताम्	रुद्युः
म.	रुद्याः	रुद्यातम्	रुद्यात
उ.	रुद्याम्	रुद्याव	रुद्याम

12. णु स्तुतौ to praise सकर्मकः—परस्मैपदी

लट्—Peresent Tense.

प्र.	नौति	नुतः	नुवन्ति
म.	नौषि	नुथः	नुथ
उ.	नौमि	नुवः	नुमः

लङ्—Imperfect Past Tense.

प्र.	अनौत्	अनुताम्	अनुवन्
म.	अनौः	अनुतम्	अनुत
उ.	अनवम्	अनुव	अनुम

लोट्—Imperative Mood.

प्र.	नौतु - नुतात्,	नुताम्	नुवन्तु
म.	नुहि - नुतात्,	नुतम्	नुत
उ.	नवानि	नवाव	नवाम

विधिलिङ्—Potential Mood.

प्र.	नुयात्	नुयाताम्	नुयुः
म.	नुयाः	नुयातम्	नुयात
उ.	नुयाम्	नुयाव	नुयाम

एवं ५ क्ष्णु, २० यु धात्वोः रूपाणि द्रष्टव्यानि ॥

7. चकास् to shine अकर्मकः— परस्मैपदी

लट्—Present Tense.

प्र.	चकास्ति	चकास्तः	चकासति
म.	चकास्सि	चकास्थः	चकास्थ
उ.	चकास्मि	चकास्वः	चकास्मः

लङ्—Imperfect Past Tense.

प्र.	अचकात्	अचकास्ताम्	अचकासुः
म.	अचकात् - अचकाः,	अचकास्तम्	अचकास्त
उ.	अचकासम्	अचकास्व	अचकास्म

लोट्—Imperative Mood.

प्र.	चकास्तु - चकास्तात्,	चकास्ताम्	चकासतु
म.	चकाधि - चकास्तात् ,	चकास्तम्	चकास्त
उ.	चकासानि	चकासाव	चकासाम

विधिलिङ्—Potential Mood.

प्र.	चकास्यात्	चकास्याताम्	चकास्युः
म.	चकास्याः	चकास्यातम्	चकास्यात
उ.	चकास्याम्	चकास्याव	चकास्याम

४. जागृ निद्राक्षये to be awake अकर्मकः—परस्मैपदी

लट्—Present Tense.

प्र.	जागर्ति	जगृतः	जाग्रति
म.	जागर्षि	जगृथः	जागृथ
उ.	जागर्मि	जगृवः	जागृमः

लङ्—Imperfect Past Tense.

प्र.	अजागः	अजागृताम्	अजागरुः
म.	अजागः	अजागृतम्	अजागृत
उ.	अजागरम्	अजागृव	अजागृम

लोट्—Imperative Mood.

